# आदर्श प्रश्नपत्रम्
## संस्कृतम्
## प्रश्नपत्र प्रारूपम्

*अवधि : होरात्रयम्* *पूर्णाङ्काः : 80*

### I. विषयाणां वर्गीकरणम्

| उद्देश्यानि | अपठित-अवबोधनम् | रचनात्मक-कार्यम् | अनुप्रयुक्त-व्याकरणम् | पठित-अवबोधनम् | योगः |
|---|---|---|---|---|---|
| अङ्कानां प्रतिशतम् | 12.50% | 18.75% | 31.25% | 37.50% | 100% |
| अङ्काः | 10 | 15 | 25 | 30 | 80 |

### II. प्रश्नानां वर्गीकरणम्

| प्रश्नप्रकाराः | निबन्धात्मकाः | दीर्घोत्तरात्मकाः | लघूत्तरात्मकाः | अति-लघूत्तरात्मकाः (1 अङ्कः) | अति-लघूत्तरात्मकाः (½ अङ्कः) | बहु-विकल्पात्मकाः |
|---|---|---|---|---|---|---|
| प्रश्नसङ्ख्याः | 4 | 15 | 13 | 6 | 6 | 20 |
| अङ्काः | 18 | 18 | 15 | 6 | 3 | 20 |

### III. विषयाधिभारः

| क्रमसङ्ख्या | विषयाः | अङ्काः |
|---|---|---|
| 1 | अपठितावबोधनम् | 10 |
| 2 | रचनात्मक-कार्यम् | 15 |
| 3 | अनुप्रयुक्त-व्याकरणम् | 25 |
| 4 | पठितावबोधनम् | 30 |
| | | योगः = 80 |

## IV. खण्ड-योजना – क, ख, ग, घ

## V. काठिन्य-निर्धारणम्

| | | |
|---|---|---|
| 1. | कठिन-प्रश्नाः | 10% |
| 2. | सामान्य-प्रश्नाः | 50% |
| 3. | सरल-प्रश्नाः | 40% |

## VI. उत्तराणाम् अनुमानिता शब्दसीमा समय-संयोजनं च

| प्रश्नप्रकाराः | अनुमानिता शब्दसीमा | अनुमानितावधिः |
|---|---|---|
| निबन्धात्मकाः | 50-80 शब्दाः | एकहोरा |
| दीर्घोत्तरात्मकाः | 30-40 शब्दाः | अर्धहोरा |
| लघूत्तरात्मकाः | 10-20 शब्दाः | अर्धहोरा |
| अतिलघूत्तरात्मकाः | एकपदेन | अर्धहोरा |
| बहुविकल्पात्मकाः | एकपदेन | अर्धहोरा |

# आदर्शप्रश्नपत्रम्-I ( 2024-25 )
## कक्षा-अष्टमी
## संस्कृतम्

*अवधिः - होरात्रयम्* *सम्पूर्णाङ्काः : 80*

***निर्देशा :***

* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।*

* *प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।*

* *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

---

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **10 अङ्काः**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

मानवजीवने समयस्य अत्यधिकं महत्त्वम् अस्ति। छात्रैः सफलतायाः प्राप्त्यर्थं समयस्य अनुपालनम् अत्यावश्यकं भवति। ये छात्राः यथासमयं पठनं, लेखनं स्मरणं च कुर्वन्ति, ते परीक्षायाम् उत्तमान् अङ्कान् प्राप्य कीर्तिं लभन्ते। तेषां दैनिकव्यवहारे अपि समयानुपालनं दृश्यते। अतः ते चिन्तामुक्ताः भूत्वा जीवने स्वकार्याणि समयेन कर्तुं समर्थाः भवन्ति। ये समयस्य सदुपयोगं न कुर्वन्ति ते जीवने साफल्यं न प्राप्नुवन्ति। कार्यनिष्पादनसमये ते चिन्तिताः भूत्वा कष्टम् अनुभवन्तिः। यतः यः समयः व्यतीतः भवति सः पुनः न आगच्छति, अतः समयस्य सम्यक् नियोजनं कृत्वा कार्याणि कर्तव्यानि। प्रकृतिः अपि अस्मान् समयपालनं शिक्षयति। सूर्यः यथासमयम् उदेति अस्तं च गच्छति।

(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) (1×2=2)

(i) का समयपालनं शिक्षयति?

(ii) मानवजीवने कस्य अत्यधिकं महत्त्वम् अस्ति?

(iii) कः व्यतीतः भूत्वा पुनः न आगच्छति?

(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्) (2×2=4)

(i) सफलतायाः प्राप्त्यर्थं किम् आवश्यकम्?

(ii) के कीर्तिं प्राप्नुवन्ति?

(iii) के कार्यनिष्पादने कष्टम् अनुभवन्ति?

(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। (1)

(ई) निर्देशानुसारम् उत्तरत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) 'सूर्यः यथासमयम् उदेति अस्तं च गच्छति।' अत्र 'गच्छति' इति क्रियापदस्य कर्ता कः?

(क) उदेति (ख) च (ग) सूर्यः (घ) अस्तम्

(ii) 'ये समयस्य सदुपयोगं न कुर्वन्ति।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(क) ये (ख) कुर्वन्ति (ग) समयस्य (घ) सदुपयोगम्

(iii) 'अङ्कान्' इति पदस्य विशेषणपदं गद्यांशे किम् अस्ति?

(क) उत्तमान् (ख) अतः (ग) पुनः (घ) प्राप्य

(iv) 'न्यूनम्' इति पदस्य विलोमपदं गद्यांशे किम् अस्ति?

(क) यतः (ख) प्राप्त्यर्थम् (ग) यथासमयम् (घ) अत्यधिकम्

## खण्डः - 'ख' (रचनात्मक-कार्यम्) 15 अङ्काः

2. मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा मित्रं प्रति लिखितं पत्रं पुनः लिखत।

छात्रावासतः (½×10=5)

शिमलानगरम्

प्रियमित्र प्रतीक !

नमोनमः।

अत्र वयं सर्वे कुशलिनः स्मः। मन्ये भवतः परिवारे अपि सर्वे (i) __________ स्युः। मित्र ! अस्मिन् वर्षे ग्रीष्मावकाशे (ii) __________ स्वग्रामं गतवान् आसम्। तत्र मम पितृव्यः स्वपरिवारेण सह वसति। तत्र गत्वा अहम् अतीव (iii) __________ अभवम्। तत्र जनानां स्वभावः सरलः अस्ति। ते परस्परं (iv) __________ वसन्ति। यदा कस्यचिद् गृहे कश्चिद् उत्सवः भवति तदा सर्वे तस्मिन् आयोजने प्रसन्नतया सहयोगं (v) __________ । यदि कस्यचित् वस्तुनः (vi) __________ भवति तर्हि सर्वे मिलित्वा तं पूरयन्ति। एतत् सर्वं (vii) __________ मम मनः प्रफुल्लितम् अभवत्। ग्राम्यजीवनम् अतीव (viii) __________ भवति। अग्रिमे वर्षे भवान् अपि सपरिवारं तत्र चलतु। तत्र गत्वा भवन्तः (ix) __________ आनन्दिताः भविष्यन्ति। पितृभ्यां मम (x) __________ निवेदयतु।

भवतः मित्रम्

सुशान्तः

**मञ्जूषा**

| |
|---|
| स्नेहेन, कुर्वन्ति, दृष्ट्वा, अभावः, आनन्दितः, कुशलिनः, शोभनम्, सर्वे, प्रणामान्, अहम्। |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत–

**मञ्जूषा** (1×5=5)

| |
|---|
| महिला, बालिका, बालः, उद्यानस्य, चित्रे, कुक्कुरः, चिक्रोडः, शिशुः, खगः, सुन्दरम्, शुकम्, पुष्पम्, अस्मिन्। |



**अथवा**

"भारतस्य राष्ट्रपतिः" इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।

**मञ्जूषा**

| |
|---|
| श्रीमती द्रौपदी मुर्मू, देशस्य, जनजातीयसमुदायस्य, उत्कलप्रदेशे, शिक्षिका, एषा, बहुपरिश्रमेण, विदेशे, सरलतायाः, योग्या, महोदया, निर्णयम्, सम्मानम्, राष्ट्रहिताय, अस्माकम्, गौरवम्। |

4. अधोलिखितां कथां मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत– (½×10=5)

सुदामा (i) __________ मित्रम् आसीत्। सः सर्वप्रथमम् उज्जयिनी-नगरे (ii) __________ श्रीकृष्णम् (iii) __________। तौ मिलित्वा गुरोः समीपम् एकादश (iv) __________ अपठताम्। कालक्रमेण वासुदेवः द्वारिकायाः राजा अभवत्। सुदामा तु अतीव (v) __________

आसीत्। पत्न्याः आग्रहेण मित्रस्य श्रीकृष्णस्य सहायतां स्वीकर्तुं सः (vi) __________ अगच्छत्। द्वाररक्षकाः तं राजसभाम् अनयन्। बाल्यबन्धुः वासुदेवः तस्य स्नेहपूर्वकम् (vii) __________ अकरोत्। श्रीकृष्णः मित्रस्य (viii) __________ प्रदत्तान् तण्डुलान् अखादत्। श्रीकृष्णः दरिद्रतां (ix) __________ तस्मै ऐश्वर्यम् (x) __________।

**मञ्जूषा**

| |
|---|
| अयच्छत्, दरिद्रः, अमिलत्, श्रीकृष्णस्य, द्वारिकाम्, भार्यया, निवारयितुम्, आलिङ्गनम्, गुरुकुले, वर्षाणि। |

**अथवा**

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत– (1×5=5)

छात्राः – संस्कृतकक्षायां भवतां स्वागतम् आचार्य!

आचार्यः – (i) ________________________________।

गणेशः – आचार्य! अद्य वयं कं पाठं पठिष्यामः?

आचार्यः – गतसप्ताहे वयम् "अहं नदी अस्मि" इति तृतीयं पाठं पठितवन्तः।

(ii) ________________________________।

रुचिरा – महोदय! मम एकः सन्देहः अस्ति। पृच्छानि वा?

आचार्यः – (iii) ________________________________।

रुचिरा – तृतीयपाठस्य अन्तिमवाक्ये 'निरामयाः' इति पदस्य कः अर्थः?

आचार्यः – (iv) ________________________________।

रुचिरा – धन्यवादाः, महोदय।

आचार्यः – अस्तु, (v) ________________________________।

**मञ्जूषा**

1. अद्य वयं तस्य अभ्याससचर्चां करिष्यामः।
2. अधुना तृतीयपाठस्य अभ्यासम् उद्घाटयन्तु।
3. धन्यवादाः, तिष्ठन्तु भवन्तः।
4. रुचिरे! निरामयाः इति पदस्य अर्थः अस्ति – रोगरहिताः।
5. आम्, आम्, पृच्छतु भवती किं प्रष्टुम् इच्छति?

## खण्डः - 'ग' ( अनुप्रयुक्त-व्याकरणम् ) 25 अङ्काः

5\. प्रदत्तविकल्पेभ्यः अधोलिखितपदानां वर्णसंयोजनं वर्णविच्छेदं च चित्वा लिखत– (1×1=1)

(अ) वर्णसंयोजनम् (केवलं प्रश्नैकम्)

(i) व् + इ + ख् + य् + आ + त् + आ

(क) विखयाता (ख) विख्यातः

(ग) विख्याता (घ) वीख्याता

(ii) प् + ऊ + ज् + अ + य् + इ + त् + उ + म्

(क) पूजयितुम् (ख) पूजयीतुम्

(ग) पुजयितुम् (घ) पूजितुम्

(आ) वर्णविच्छेदः (केवलं प्रश्नैकम्) (1×1=1)

(i) कुटीरम्

(क) क् + ऊ + ट् + ई + र् + अ + म्

(ख) क् + उ + ट् + ई + र् + अ + म्

(ग) क् + उ + ट् + इ + र् + अ + म्

(घ) क् + उ + ट् + ए + र् + अ + म्

(ii) कक्षायाः

(क) क् + अ + क् + ष् + आ + य् + आः

(ख) क् + अ + क् + स् + आ + य् + आः

(ग) क् + आ + क् + ष् + आ + य् + आ

(घ) क् + आ + च् + ष् + आ + य् + आ

6\. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत–
(केवलं प्रश्नत्रयम्) (1×3=3)

(i) कक्षायाम् एका **प्रश्नोत्तरी** आयोजिता अस्ति।

(ii) मेघाः अन्नं स्वयं **न+अदन्ति**।

(iii) शिष्यः यात्रिणः **समीपं गत्वा** अवदत्।

(iv) पिता यथा कथयति अहं **तथा+एव** करोमि।

7. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा वाक्यानि पूरयत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) संस्कृतस्य ____________ कक्षां प्रविशति।

(क) अध्यापकौ (ख) अध्यापकाः

(ग) अध्यापकः (घ) अध्यापकम्

(ii) महर्षिः यात्रिणे रसयुक्तानि ____________ दातुं स्वशिष्यं प्रेषितवान्।

(क) फलस्य (ख) फलानि

(ग) फलेन (घ) फलानाम्

(iii) ____________ नाम रचना अस्ति।

(क) तस्याः (ख) ताः

(ग) तया (घ) तस्य

(iv) जनाः ____________ विषमिश्रितरसायनपदार्थान् क्षिपन्ति।

(क) नद्याः (ख) नद्याम्

(ग) नदी (घ) नदीम्

8. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत–(केवलं प्रश्नत्रयम्) (1×3=3)

(i) करण्डके ____________ फलानि सन्ति। (52)

(क) द्विपञ्चाशत् (ख) सप्तपञ्चाशत्

(ग) पञ्चपञ्चाशत् (घ) त्रयःपञ्चाशत्

(ii) कक्षायां ____________ अध्यापिका पाठयति। (1)

(क) एकः (ख) एका

(ग) एकम् (घ) एकाम्

(iii) सभायाम् ____________ जनाः सन्ति। (95)

(क) सप्तनवतिः (ख) पञ्चनवतिः

(ग) एकनवतिः (घ) एकोनपञ्चाशत्

(iv) उद्याने ____________ कन्याः क्रीडन्ति। (21)

(क) विंशतिः (ख) चतुर्विंशतिः

(ग) एकविंशतिः (घ) द्वादश

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– (केवलं प्रश्नचतुष्टयम्) (1×4=4)

(i) शृगालः <u>बिलात्</u> बहिः उद्घाटितेन मुखेन तिष्ठति।

(ii) महात्मा <u>भोजनं</u> विना कुटीरं प्रत्यागच्छत्।

(iii) <u>गुरवे</u> नमः।

(iv) छात्राः <u>कक्षायां</u> पठन्ति।

(v) अहं <u>मित्रे</u> विश्वसिमि।

10. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा वाक्यानि पूरयत– (1×3=3)
(केवलं प्रश्नत्रयम्)

(i) सर्वे सुखिनः ___________।

(क) भवतु (ख) भव (ग) भवन्तु (घ) भवताम्

(ii) काकः चटका च वृक्षे एकं सुन्दरं गृहम् ___________।

(क) अपश्यताम् (ख) अपश्यम् (ग) अपश्यन् (घ) अपश्यत्

(iii) छात्राः आचार्यं ___________।

(क) नमति (ख) नमामि (ग) नमसि (घ) नमन्ति

(iv) वाटिकायां पुष्पाणि ___________।

(क) शोभन्ते (ख) शोभसे (ग) शोभते (घ) शोभेते

11. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा <u>पूर्णं वाक्यं</u> लिखत–
(केवलं प्रश्नत्रयम्) (1×3=3)

(i) वयं कलाममहोदयस्य विषये <u>**ज्ञातुम्**</u> इच्छामः।

(ii) शृगालः अवसरं <u>**प्र + आप् + ल्यप्**</u> प्रतिदिनम् एकं मूषकं खादति स्म।

(iii) महात्मा किञ्चित् कालं प्रतीक्षां <u>**कृत्वा**</u> प्रत्यागच्छत्।

(iv) काकः चटका च <u>**मिल् + क्त्वा**</u> सुखेन वसतः।

12. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत <u>पूर्णं च वाक्यं</u> लिखत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) त्वम् __________ पाठं पठ।

(ii) तव विद्यालयः __________ अस्ति?

(iii) __________ श्रावणमासस्य पूर्णिमा तिथिः अस्ति।

**मञ्जूषा –** | अद्य, उच्चैः, कुत्र |

13. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत–(1×2=2) (केवलं प्रश्नद्वयम्)

(i) नद्याः जलं पोषकशक्त्या <u>**परि + पूर्णं**</u> भवति।

(ii) यात्री प्रतिदिनं <u>**दुर्वचनानि**</u> वदति स्म।

(iii) पुत्रः जनकम् <u>**अनु + सरति**</u> ।

## खण्डः - 'घ' ( पठित-अवबोधनम् ) 30 अङ्काः

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत् तदा सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्। किञ्चित् कालात् अनन्तरं सः एव नागरिकः महात्मानं पुनः भोजनाय निमन्त्रितवान्। महात्मा यथासमयं तस्य गृहं गतवान् परन्तु सः नागरिकः गृहे कस्मिंश्चित् कार्ये संलग्नः आसीत्। अतिथेः आगमनस्य सूचनां प्राप्य अपि सः बहिः न आगतः। किञ्चित् कालं प्रतीक्षां कृत्वा महात्मा स्वकुटीरम् आगच्छत्।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) महात्मा विठोवा कं निर्माय वसति स्म ?

(ii) एकः दर्शनार्थी नागरिकः रात्रिभोजाय कं प्रार्थयत् ?

(iii) महात्मा विठोवा किं स्वीकृतवान् ?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) महात्मा विठोवा यदा भोजनाय नागरिकस्य गृहम् अगच्छत् तदा किम् अभवत् ?

(ii) कस्य आगमनस्य सूचनां प्राप्य अपि सः बहिः न आगतः ?

(iii) भक्ताः महात्मनः दर्शनाय आगत्य किं कुर्वन्ति स्म ?

(इ) निर्देशानुसारम् उचितं विकल्पं चित्वा लिखत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) 'वसति स्म' इत्यस्य क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम्?

(क) महात्मा (ख) भक्ताः

(ग) नागरिकः (घ) निर्माय

(ii) 'दर्शनार्थी' इत्यस्य किं विशेष्यपदं गद्यांशे प्रयुक्तम् ?

(क) दर्शनार्थी (ख) एकः

(ग) नागरिकः (घ) एकदा

(iii) 'दिवसे' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) बहिः (ख) कुत्रचित्

(ग) कालम् (घ) रात्रौ

15. अधोलिखितं श्लोकद्वयं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।<br>
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।।<br>
येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।<br>
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति ।।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) कस्य त्रिविधं द्वारम् ?

(ii) किं क्रोधेन आत्मनः उन्नतिः भवति ?

(iii) मनुष्यरूपेण के चरन्ति ?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) गुणहीनाः विद्याहीनाः च कुत्र भारभूताः भवन्ति ?

(ii) आत्मकल्याणम् इच्छन् नरः किं त्यजेत् ?

(iii) नरकस्य द्वारम् आत्मनः किं करोति ?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) श्लोके 'मृगाः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

(क) चरन्ति (ख) त्यजेत्

(ग) येषाम् (घ) भारभूताः

(ii) 'पशवः' इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम्?

(क) आत्मनः (ख) मृगाः

(ग) मनुष्याः (घ) भुवि

(iii) 'इदम्' इति पदस्य किं विशेष्यपदं श्लोके प्रयुक्तम्?

(क) भुवि (ख) नरकस्य

(ग) त्रयम् (घ) द्वारम्

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

(अष्टमी-कक्षायाः छात्राः परस्परं वार्तालापं कुर्वन्ति।)

सुशान्तः – भो मित्राणि! किं भवन्तः जानन्ति अद्य का तिथिः अस्ति?

गरिमा – आम्, अहं जानामि। अद्य श्रावणमासस्य पूर्णिमा तिथिः अस्ति।

प्रशान्तः – वयम् इदम् अपि जानीमः यत् प्रतिवर्षं श्रावणमासस्य पूर्णिमायां 'संस्कृत-दिवसः' आयोज्यते।

(तदैव अध्यापकः कक्षां प्रविशति।)

सर्वे छात्राः –(उत्थाय) हे आचार्य! संस्कृतदिवसे वयं भवन्तं वर्धापयामः।

आचार्यः – धन्यवादाः। स्वस्ति युष्मभ्यम्। शुभः भवतु संस्कृतदिवसः युष्मभ्यं सर्वेभ्यः।

प्रणवः – आचार्य! अद्य अस्माभिः संस्कृत-विषये एका प्रश्नोत्तरी आयोजिता अस्ति।

सुमेधा – सम्पूर्णा कक्षा द्वयोः वर्गयोः विभक्ता अस्ति। एकः कालिदासवर्गः अपरः च भासवर्गः अस्ति।

प्रणवः – एकस्य प्रश्नस्य उत्तरं कालिदासवर्गः दास्यति। अपरं प्रश्नं च भासवर्गः उत्तरिष्यति।

(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½×2=1)

(i) श्रावणमासस्य पूर्णिमायां किम् आयोज्यते?

(ii) अध्यापकः कुत्र प्रविशति?

(iii) छात्रैः का आयोजिता?

(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) के परस्परं वार्तालापं कुर्वन्ति?

(ii) आचार्यः किम् आशीर्वचनं कथयति ?

(iii) संवादे सुमेधा किं कथयति ?

(इ) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) (1×2=2)

(i) 'संस्कृतदिवसे वयं भवन्तं वर्धापयामः ?' अस्मिन् वाक्ये क्रियापदं किम् ?

(क) संस्कृतदिवसे (ख) वयम्

(ग) वर्धापयामः (घ) भवन्तम्

(ii) 'अध्यापकः' अस्य पदस्य किं पर्यायपदं संवादे अस्ति ?

(क) आयोजितः (ख) आचार्यः

(ग) छात्रः (घ) तिथिः

(iii) 'वर्गयोः' इत्यस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(क) द्वयोः (ख) एका

(ग) तिथिः (घ) कक्षा

17. मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पूर्णम् अन्वयं पुनः लिखत–(1×4=4)

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।।

**अन्वयः**– अधमा (i) ___________ इच्छन्ति, (ii) ___________ धनं मानं च इच्छन्ति, उत्तमाः (iii) ___________ इच्छन्ति, मानः हि (iv) ___________ धनं (भवति)।

**मञ्जूषा**

| महताम्, मध्यमाः, धनम्, मानम् । |
|---|

**अथवा**

मञ्जूषातः समुचितपदानि चित्वा अधोलिखितसूक्तेः भावार्थं पूरयित्वा लिखत–

**सूक्तिः** – सर्वस्य लोचनं शास्त्रम्।

**भावार्थः**– शास्त्राणाम् (i) ___________ एव मनुष्यस्य वास्तविकं (ii) ___________ अस्ति। ज्ञानशक्त्या एव मानवस्य (iii) ___________ सिध्यन्ति। अतः शास्त्राणां ज्ञानं (iv) ___________ सदैव तत्पराः भवेयुः।

**मञ्जूषा**

| कार्याणि, ज्ञानम्, प्राप्तुम्, नेत्रम् । |
|---|

18. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा <u>पूर्णं वाक्यं लिखत</u>, केवलं प्रश्नवाचकंपदं न लेखनीयम्– (केवलं प्रश्नचतुष्टयम्) (1×4=4)

(क) <u>**प्राणिजीवनाय**</u> विशुद्धं पर्यावरणम् आवश्यकम् अस्ति।

(ख) मूषका: <u>**तीक्ष्णदन्तैः**</u> शृगालस्य नाशम् अकुर्वन्।

(ग) <u>**चटकाया:**</u> गृहम् अपि नष्टम् अभवत्।

(घ) <u>**कलाममहोदयेन**</u> रक्षाक्षेत्रे अनेकानि कार्याणि कृतानि।

(ङ) मया द्विवारं <u>**भवत:**</u> अपमान: कृत:।

19. मञ्जूषायां प्रदत्तपदेभ्य: समुचितपदं चित्वा अधोलिखितां कथां पूरयत– (½×6=3)

एकस्मिन् वने एक: __________ भोजनाय इतस्तत: भ्रमति स्म। स: मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति स्म। स: तेषाम् अनुसरणं कृत्वा तेषां __________ समीपं सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। मूषका: तं दृष्ट्वा विस्मिता: भूत्वा तं शृगालं च __________ इति अमन्यन्त। ते प्रतिदिनं शृगालं सेवितुं तत्र आगच्छन्ति स्म। परम् अवसरं प्राप्य स: धूर्त: प्रतिदिनम् एकं __________ खादित्वा हृष्ट: पुष्ट: अभवत्। इदं दृष्ट्वा सर्वेषां शङ्का शृगालस्य उपरि एव अभवत्। अग्रिमे दिवसे योजनां निर्माय सर्वे मूषका: दूरम् अतिष्ठन् मूषकराज: च तत्र एकाकी एव तिष्ठति। शृगाल: इदं दृष्ट्वा मूषकराजं प्रहरति। __________ मूषका: शृगालम् आक्रम्य तीक्ष्णदन्तैः तस्य __________ कुर्वन्ति स्म।

**मञ्जूषा** – बिलस्य, मूषकम्, नाशम्, सावधाना:, शृगाल:, महात्मा

20. अधोलिखितानां पदानां समुचितार्थान् मञ्जूषात: चित्वा समक्षं लिखत– (1×4=4)

(i) वसुधा

(ii) तटे

(iii) सागरम्

(iv) मातु:

**मञ्जूषा**

जनन्या:, पृथ्वी, तीरे, समुद्रम्।